मानेजषाणिधाने·उभयोरपिग्रहणं·धान्यमायः मामानरत्यस्यस्त्रीभावनार्थत्वोकर्मकत्वात्यग्रह
हणो आतोऽनुपसर्गे कः आदंताद्धातोरनुपसर्गात्कर्मण्युपपदे कः प्रत्ययः स्यात् अणोपवादः पा
र्ष्णित्रेऽनुपसर्गे किं·गोसंदायः अत्र वार्तिकं·विघोर्सर्वत्र प्रहारात्मिभ्योऽः संप्रमारणामाजः प्रमार राम
णानःत्पावपोहानो ब्रह्मजिनातीतिब्रह्मज्य·सर्वत्र ग्रहणान्नेहैवश्रात श्रोपसर्गेश्राकः प्रज्ञः अत्र के ९५

मति संप्रसारणं स्यात्। आह्वा। आहूति। छिन्ने संप्रसारणे पूर्वत्वे च कृते उवङादेशे आहुवः। प्रहुवः। इति प्राप्नोति। ए
वं ह्वस्थानिवद् इति प्राप्नोति। न चैरनेकाचः इति यणा। अंगस्य एकाच्त्वात्। ननु उभयत्रापि संप्रसारणे कृते आतो
लोपः। तस्य स्थानिवद्भावादियवङ्। उवङ् न भविष्यतीति चेत्। स्यादेवं। यदि आतो लोपो लभ्येत। स तु दुर्लभः। अं
तरंगेण पूर्वत्वेन बाधात्। न च वार्णादांगं बलीयः। आश्रयत्वात्। न चैवमपि व्यर्थमेव वार्तिकं। प्रागेव संप्रसा
रणादातो लोपे कृते तस्य स्थानिवद्भावात् सिद्धत्वात् ह्वः उवङ् प्रसक्तो यणादेशेन आह्वः प्रह्वः इत्यादेः सिद्ध
त्वात्। तथा हि नित्यं संप्रसारणं आतो लोपे कृते अकृते च प्रसंगित्वात्। आतो लोपस्तु कृते संप्रसारणे पूर्व
पि पूर्वत्वेन बाध्यते। तथापि यस्य च निमित्तं लक्षणांतरेण विहन्यते न तदनित्यमिति नित्य एव। उभयो
र्नित्ययोः परत्वादातो लोपः। ततः संप्रसारणं न। नाः इयं उवङोः प्रसक्तौ। आतो लोपस्य स्थानिवत्त्वान्न भवि
ष्यतः। न चानादिष्टाद् अचः पूर्वत्वं नास्तीति वाच्यं। स्थानिद्वारकस्य तस्य सत्त्वात्। यतिह्वस्के इत्यप्यटेनोक्तं शा
स्त्रीयकार्ये सिद्धये स्थानिवद्भावो विधीयते। न त्वनादिष्टादचः पूर्वत्वे लौकिककृत्वनितचोपा। ततः अचः पर
स्मिन्निति अतिदेशस्य शास्त्रीयतया तस्यैव स्थानिवत्त्वात् तेनातिदेशासंभवतो निष्प्रयोजनत्वा
स वार्णग्रहणा घ्रपद्मेन प्रागेव वर्णितत्वात्। किंचाकारलोपस्य आभीयत्वेनासिद्धत्वात् दोषः। नैवं तु ह्व

श.द.३ वत्वः नुङ्हुङः अत्रापि ङ्वङ्नस्यादितिवाच्यं । ख्यानिङ्वारकस्यानादिष्टादचः पूर्वत्वस्य आभीयासिद्धत्व
९६ स्य वत्र अनित्यत्वेमेहप्रवृत्तेः अथवा संप्रसारणाच्च एङः पदान्तादित्यत्र एङे इतियोगो विभज्यते । संप्रसा
रणादेङि । परे पूर्वपरयोः पूर्वे एकादेशो भवतीति संप्रसारणाच्चेति क्रियते तापनार्थेमिदंयत्रसंप्रसारणा
त्परएङ्संभवतितत्रानेमितिकत्वेनांतरंगमप्यान्तं अकृत्वा संप्रसारणं कर्तव्यमितितेनजुहुवत्व
रित्यत्र एङ् । नाद्वेवेति विहितेनसंप्रसारणं पूर्वं । मनश्च नख्यानिवत्वेनाप्यसिद्धत्वमिति सिद्धमिष्टं आह्नः
पद्धः इत्यत्र तु आकारांतलक्षणः स्यायो असत्यात्वेकत्वेपशक्यः अतः पूर्वमात्वेन तः स्यप यः आल्लोपः
संप्रसारणं ख्यानिवद्भावादसिद्धत्वादाद्दरय ङ् । वङ्डेरभावः तस्मान्माक्त्वा त्विकमिति चेत् । मत्परत्यंप्र
त्याख्यानमेवभाष्येकिंत्वेत्रास्तिवार्तिकस्याप्युक्तिसंभवः आभात्कृत्वप्रत्याख्यानपक्षेहि ख्यानिवत्वमे
वशरणं । नत्रवख्यानिवद्वारकअनादिष्टादचः पूर्वत्वमाश्रयणीयं । तच्चानित्यमितिज्ञापयितुमिदंवार्ति
कमिति । एतत्सर्वाप्याख्यानं तुप्रवृत्तो भाष्यकारो विख्यानिवद्भावमुपन्यस्य हूषयित्वा असिद्धत्वाशरणी
कुर्वन्नख्यानिद्वारिकायाः अनादिष्टादचः पूर्वतायाः कार्चित्कतां ध्वनयति । तत्फलंश्वचः परस्मितित्रितिसूत्र राम
त्रएवावोचामेत्यलंवङ्नः सुपिस्थः स्थ्वं ते उपपदे तिष्ठतेर्धातोः कप्रत्ययः स्यात् । मनःस्थः विषमस्थः । अत्र सु ९६

वीतियोगो विभज्यते· सुपि· आकारांतेभ्यः धातुभ्यः कः स्यात्· द्वाभ्यां पिबतीति द्विपः· नन्वत्र सुपि तिष्ठतेः
कः स्यात् भावे· आखूनामुत्थानं आखूत्थः शकिपाकौ सुधातु आखुत्थमिति नपुंसके पठ्यते न त्वामासादिकेभा
ष्या हैसबंधप लिंगास्पे चोदाहृतत्वात्· स्थः कर्त्तरि इमनिजभावे कः· किर्द्योः पादितोन्यतर इति अमरकोशे
भावे कस्य मुहूर्त्तविधानाच्च· भावेन णकविज्ञो लाइति नपुंसकविधाने कस्य पर्युदासाच्च· ननु स्थ इति सू
त्रेण विधीयमानोपि कः कृत्वा कर्त्तर्येव स्यादिति चेत् न· आत इत्यनेनैवासिद्धेः· तथा च स्थ इत्यारंभसामर्थ्या
त्कर्त्तरि किं तु अनिर्दिष्टार्थत्वात् स्वार्थे धातोः स्वार्थो भाव एव· न च घञर्थे कविधानमित्यनेनैव गता
र्थत्वमिति वेत्तन· घातिकं दृष्ट्वा स्थ इत्यस्य नोपवृत्तेः· किंच नित्यसमासार्थमिदं· अन्यथा द्विपबतीति स्वेपा
पास्ति कः समासः इष्यते न तु नित्य उपपदसमासः तथा चाखूनामुत्थानमिति अस्वपदविग्रहः क्रियते· अन
र्थे कविधाने स्थास्नापाव्यधिहनियुध्यर्थमित्यत्र स्थाग्रहणात्तु कर्त्तर्येव जिनि कारके यथा स्यादित्येवमर्थं
इत ऊर्ध्वं कर्मणि सुपीति च द्वयमप्यनुवर्त्तते· तत्र सकर्मकेषु कर्मणि सुपि तिष्ठते· स्थः शोनरकुरु नियावती·
अन्यत्र सुपीति· स्वष्टाजानौ णिनि रिनियावतः· एवं च यद्यपि स्थ इत्यस्य स्थग्रहणस्य उपसर्गनिपातत्वमस्ति द्विध
निवृत्त्यर्थेनोपसर्गेपीत्यनेन तापितमिति स्तु समानपारिहार्थे णिनि विधौ पुनः स्थग्रहणमिति वहस्य·

३।२३ कः। तुंदशोकयोः परिमृजापनुदोः। तुंदशोकयोः कर्मणोरुपपदयोः परिमृजापनुदिभ्यां धातुभ्यां कः प्रत्ययः
९७ स्यात्। अलससुखाहरणयोरिति वक्तव्यं। आलस्ये सुखोत्पादने च गम्यमाने प्रत्ययइष्टः। न च सामर्थ्यादल
से कर्तरि सुखस्य चाहर्तरि प्रत्ययइति फलितं भवति। तुंदं परिमार्ष्टीति तुंदपरिमृजः। अलसः। अत्र मृजेरजा
दौ इति चे कस्य कीदृग्दिर्नैतिहास्त्वं भवतीत्यपरे मन्यमाने तु यथालाभं लभ्यते इति चेति सूत्रेषु प्रतिपादितं मृ
जः प्रागन्यत्र तुंदपरिमार्ज इत्येव भवति। शोकापनोदः। कप्रकरणे मूलविभुजादिभ्य उपसंख्यानं। नास्त्यर्थे
एषां च तत्र थो। मूलविभुजादिभिर्ध्यातव्यमित्यर्थः। मूलानि विभुजतीति मूलविभुजः रथः। नखानि मुंचतीति नख
मुचानि धनूंषि। कौ मोदते इति कुमुदं सरोरुहं इत्याद्यपि काकगुहास्तिला इति भाष्यवृत्त्यादिषु दृष्टं तथा
निधनूंषि। कौ मोदते इति कुमुदं सरोरुहं इत्याद्यपि काकगुहास्तिला इति भाष्यवृत्त्यादिषु दृष्टं तथा
विकाकेभ्यो गृहितव्या इति कमोर्थं विगानेध्येन र्थेक विधानमित्यर्थे दृष्टमिति हरदत्तः। आकृतिगणोयं।
तेन महीध्रकुध्रशिरोरुहादि सिद्धं। प्रदात्रः। अनुपसर्गे ज्ञः। आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः प्र
त्ययः स्यात्। अणोपवादः। सर्वैः प्रदः। पार्ष्णित्रः। इति किं। गोसंदायः। अनुपसर्गइत्यनुहर्नेः। प्रत्युदाहरणस्मिन् राम
नुपसर्गे सति को न भवति किंतु अणेव भवति। गोसंदायः। इह हनो दत्ता नेरित्युक्तं न तु भमं चेतोदा रूपाणि ९७

णामुपलक्षणं गामादाग्रहणेष्वविशेषादिति हरदत्तः। समि ख्यः। संपूर्वात्ख्या इत्यस्मात्कर्मण्युपपदे कप्रत्ययः
स्यात्। गाः संचष्टे गोसंख्यः। चक्षिङः ख्याञादेशः। ख्या प्रकथने इत्यस्य तु संपूर्वस्य प्रयोगो नास्तीति स्मकारः। गा
पोष्टक्। आभ्यां टक् स्यादनुपसर्गे कर्मण्युपपदे। सामगः। सामगी। अत्र वार्त्तिकं। सुराशीध्वोः पिबतेरिति। अपिबते
रितिनिषु ष्टिकरणानुष्टिकरणपरिभाषाबालबोधार्थं कथनं। उपपदपरिगणनं तु वाचनिकमेव। सुरापः। सुरापी। शीधु
पी। सुराशीध्वोः किं। क्षीरपा ब्राह्मणी। पिबतेरिति किं। सुरां याति रक्षतीति सुरापाः। अनुपसर्गे किं। सामसंगायः। गामादा
ग्रहणेष्वविशेषेपि गैशब्दस्यैवात्र ग्रहणं न तु गाङ् गतावित्यस्य सानुबन्धस्य। न त्वगात्कनाविति तु हेलपादेः
निरनुबन्धेन अलुग्विकरणेन च पिबतिना साहचर्यात्। ते॰ अनभिधानाद्वा बहुलग्रहणाद्वा ब्राह्मणी सुरापा भवति।
नैनां देवाः पतिलोकं नयन्ति। हरतेरनुद्यमनेऽच्। उद्यमनादन्यस्मिन्नर्थे वर्तमानाद्धरतेः कर्मण्युपपदेऽच् स्या
त्। अंशहरः। रिक्थहरः। अनुद्यमने किं। भारहारः। अत्र च प्रकरणे शक्तिलांगलांकुशतोमरयष्टिघ
टघटीधनुःषु ग्रहेरुपसंख्यानं। शक्तिग्रहः। लांगलग्रहः इत्यादि। लिंगविशिष्टपरिभाषया घटस्य ग्रहणेनैव सिद्धे
घटीग्रहणं लिंगविशिष्टपरिभाषाया अनित्यत्वज्ञापनार्थं। तेन मद्रराज्ञीत्यत्र टच् न। द्विषतीताप इत्यत्र द्विषत्प
रयोः स्तापेरिति वचनेनेति दिक्। सूत्रे च धार्यर्थे ग्रहेरुपसंख्यानमित्येव। सूत्रग्रहः। धार्यर्थ इति किं। सूत्रं केवल

शा॰ह३ लमुपपादत्ते ननधाप्यति नन्वाणो व यथा स्याव॰ हृत्वयाहः। वयसि च॥ वयसि गम्यमाने हृतो धातोः कर्मण्युपपदेऽच्
९८ स्यात्॰ अणोपवादः उद्यमनार्थ आरंभः कवचहरः क्षत्रियकुमारः इह कवचोद्यमनं क्रियमाणं संभाव्यमानं वा
वयो गमयति॰ तेन असत्यपि कवचग्रहणे कवचहर इत्यपि भवति॥ आङि ताच्छील्ये॥ आङ्॰पूर्वाद्धरतेः कर्मण्युपप
देऽच्प्रत्ययः स्यात्ताच्छील्ये गम्यमाने॰ पुष्पाण्याहर्तुं शीलमस्य पुष्पाहरः फलाहरः ताच्छील्ये किं भारमाहरति
भाराहारः॥ अर्हः॥ अर्हेः पूजायामित्यस्मात्कर्मण्युपपदेऽच्स्यादणोपवादः॥ स्त्रियां विशेषः पूजार्हा ब्राह्मणी॥ स्तंबक
र्णयो रमिजपोः॥ स्तंबकर्णयोरुपपदयोः यथासंख्यं रमिजपिभ्यामच्प्रत्ययः स्यात्॰ रमिरकर्मकः जपिस्तु श
ब्दकर्मकः। मंत्रं जपतीति दर्शनात्॰ अभावपक्षे तिस्तंबकर्णयोः कर्मत्वासंभवान्नस्ठपीत्येवाच संबध्यते॰ हस्ति
स्तंबकर्णयोरिति वक्तव्यं स्तंबे रमते इति स्तंबेरमो हस्ती॰ तत्पुरुषे कृति बहुलमिति अलुक्॰ हलंतादिति वा कर्णे
जपः सूचकः हस्तिसूचकाभ्यामन्यत्र स्तंबेरता॰ कर्णेजपिता मशकः॥ उपांशुशब्दोऽपि नेत्यर्थः॥ शमि धातोः सं
ज्ञायां॥ शमि उपपदे धातुमात्रात्संज्ञायां विषयेऽच् स्यात्॰ शंकरः शंभवः शंवदः धात्वधिकारोत्तुन्हान्नमह
णामपवादविषयेऽपि प्रवृत्त्यर्थं॰ तथा च वार्त्तिकं॰ शमि संज्ञायां धातुग्रहणं कृञो हेत्वादिषु टप्रतिषेधार्थमिति एम
अमनि धात्वग्रहणे शमि संज्ञायामिति अस्यावकाशः शंभवः शंवदः। कृञो हेतुताच्छील्यस्यावकाशः आढ्यंकरः ९८

शंकरइत्यत्रोभयत्रसंज्ञोपरत्वात् टप्रत्ययात् धातुग्रहणासामर्थ्या। दन्तेवमवति·शंकरानाम परिव्राजिकातच्छीलाः
कुणरवाडवस्त्वाचार्योमन्यते·शृणाति शब्दकर्मणा उत्पेतरूपं·पृषोदरादित्वात् गकारस्य ककार इति तन्मते
धातुग्रहणं चिंत्यप्रयोजनं। अधिकरणे शेतेः। ह्वपीति संबध्यते अच् स्यात्·खे शेते खशयः·पार्श्वादिषूपसंख्या
नं·पार्श्वाभ्यां शेते पार्श्वशयः। पृष्ठशयः·उदरशयः·दिग्धसहपूर्वाच्चेति वक्तव्यं·दिग्धेन सह शेते इति विग्रहे दिग्ध
सहशयः·अत्र दिग्धसहशब्दो मयूरव्यंसकादिः तस्य शय शब्देन सह उपपदसमासः·उत्तानादिषु कर्तृषु·उत्ता
नः शेते उत्तानशयः। अवमूर्द्धशयः·अवनतो मूर्द्धा अस्य अवमूर्द्धा·अधोमुखः शेते इत्यर्थः। गिरौडः छंदसि·गिरौ शे
ते इति गिरिशः·उछितो वा·गिरिः अस्यास्तीति गिरिशः।लोमादित्वात् शः·इह यद्यपि छन्दसि ताभ्यां गिरिशशब्दो द्विधा
भाष्यवार्त्तिकयोर्व्युत्पादितः। तथापि लोके तद्धितांतं एवं न तु कृदंतः छंदसीत्युक्तेः एवं व्युत्पत्त्या हृताह्वो गिरिशः प्र
भावात् आरोपितं यद्गिरिशोन पश्यात्·गिरिशमुपचाराघृत्य हसा सुकेशीरित्यादिषु युंजानानां कवीनां न काप्यु
राधः। गिरीशो तु इति तत्स्यावत्ताणां नातुपमा दृष्टव्यत्पवधेयो वररेखा। अधिकारोऽयं पदे चरेष्टः·कुरुचरः·कुरुचरी॥
भिक्षासेनादायेषु च। एष्यः उपपदेषु चरेष्टः स्यात्·भिक्षां चरतीति भिक्षाचरः·चरति रक्षचरणात् पूर्वे के अर्जने वर्त्तते·
वर्त्तने भीक्षामर्ज्जयतीत्यर्थः। सेनां चरति प्रविशतीति सेनाचरः। आदायेति·ल्यबंतं·आदाय गच्छतीति आदायचरः।

श२३ मज्ञपतीनिवा॰ कथंपेन्नन्तितेसहचरीयवधायद्देहमिति॰ पत्त्वादिषुवपड्जिनिपद्यते॰ स्तुप्तुपेनिसमासाः रविधानत्व
९९ नित्यसमार्थौ॥ पुरोग्रतोग्रेषुसर्तेः॥ टः स्यात् पुरःसरः अग्रतःसरः अग्रसरः अग्रेणा वा सरतीत्यग्रेसरः स्त्वे अग्रश
ब्दस्य एदंतत्वमपि निपात्यते कथं तर्हि पथं नदस्यसरगार्विति कृदृक्षसारमिति॰ वाहुलकादिति हरदत्तः॥ पू
र्वे कर्त्तरि॥ कर्त्ते चापि निपूर्वेश रेण्यपदे सर्तेः टव स्यात्॰ पूर्वीः सरतीति पूर्वसरः कर्त्तरीति किं॰ पूर्वं देशं सर
तीति पूर्वसरः॥ कृञो हेतुताच्छील्यानुलोम्येषु॥ हेत्वादिषु द्योत्येषु कृञो टः स्यात्॰ शोकस्करी विद्या॰ यशः
स्करी॥ तीतिसः ताच्छील्य॰ श्राद्धकरः॥ आनुलोम्ये वचनकरः॥ एषु किं कुम्भकारः॥ इह धासिद्धतरत्वा ह्यनु
बंधकोपिकरोतिविपत्यन्नैन तत्कुनाहिंसायामिति॥ हेतुः कारणं॰ आनुलोम्यमाराधा विनासुवर्तनं
दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबह्वनांदीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजं
घाबाह्वहर्यत्तद्धनुररुःषु॥ एषु सप्तदशसूपपदेषु यथायोगं कर्मस्तु शत्ययपदेषु करोतेष्टः स्यात्॥ अहेत्वाद्यर्थमारं
भः॥ दिवादिवसे करोति निपातिन श्रेष्ठासुक्तानि निदिवाकरः॥ अत्र दिवाशब्दः अधीनिसमन्यन्तस्यार्थे व
र्तते इत्ति तिनस्य कर्मत्वानुपपत्तेः सुपीत्यनेन संबंधः शेषाणां तु कर्मणीत्यनेन यत्तु हरिदत्तान्त्रिविषये दीपाम राम
स्य महः॥ दिवामप्याहारित्रिरितिवत्कर्मे तमस्तु पराप्यते नदास सर्वेषां कर्मणीत्यनेनैव संबंधो ग्यः॥ विभा ९९

विभाकरः॥ निशाकरः॥ प्रभाकरः॥ भास्करः॥ सूत्रे भास्करांते निभाः शब्दस्य अत्वयसंनियोगेन सकारो निपात्यते ने
नभास्कर इत्यत्र विसर्जनीयजिह्वामूलीयौ न भवतः यत्तु कस्कादिर्वी प्यः कास्करः कर एवकारः प्रत्तादित्वा
त्स्वार्थे अण्॥ अंतकरः॥ अनंतकरः॥ अंतकरशब्देन नञ्पूर्वसमासेऽप्येतदेवरूपं॥ स्वरे तु विशेषः॥ नञ्समासे हि स
ति शिष्टे अव्ययपूर्वपदप्रकृतिस्वरः॥ अनंतशब्दस्य उपपदत्वे तु कृदुत्तरपदप्रकृतिस्वरेण अंतोदात्तत्वं॥ आदिक
रः॥ बहुकरः॥ बहुशब्दोऽत्र वैपुल्यवचनं॥ संख्यावचनस्य तु संख्याग्रहणेनैव सिद्धेः॥ नांदीकरः॥ लिपिलिविशब्दौ प
र्यायौ॥ लिपिकरः॥ लिविकरः॥ बलिकरः भक्तिकरः॥ कर्तृकरः॥ चित्रकरः॥ क्षेत्रकरः॥ संख्या॥ एककरः॥ द्विकरः॥ जंघाकरः
बाहुकरः॥ अहस्करः॥ अहरः रोरुपीति रेफः॥ कस्कादित्वात्सः॥ यत्करः॥ तत्करः॥ धनुष्करः॥ अरुष्करः॥ नित्यं समासेऽन
रपदस्थस्येति षत्वं॥ किंयत्तद्बहुषु कृञोऽज्विधानं॥ वार्त्तिकमेतदिति कैय्यटहरदत्तौ॥ इष्टिरिति माधवः॥ किंकरा
यत्करा॥ तत्करा॥ वार्त्तिके नप्रत्ययबाधा टस्याभावात्॥ किंकरी त्वसाधुरिति कैय्यटः॥ हेत्वादावपि परं बाधित्वाप
रत्वादजेवेति तस्याशयः॥ हरदत्तस्तु पदात्तामप्युक्तं अथ यथा दिषु पाठः कश्चिन्नष्ट इति इह किमाश्रित्य हरदत्तमप
नीय पचादिषु च किंयत्तद्बहुषु कृञ इति परिगणनमिति तस्यार्थः॥ वार्त्तिकमपि उत्सर्गमेव व्याख्येयमित्याशयः॥ स्त्र
स्त्रियां पक्षे हेत्वादिविवक्षायां परत्वात् टएवनभावेनेन किंकरा शीला किंकरीति भवत्येव॥ पुंयोगाद्विवक्षायां तु

शब्द३
१००

न्तनिर्विवादोऽसीय·किंयत्तद्बहुष्वज्ञेति प्रक्रियायां विकल्पोक्तिः स्तत्याकरविरुद्धत्वात्कर्मण्युपपदेविपत्वेषसंगाद्यायु
क्तैव·न चाजभावे सोऽत्र दृष्टः सूत्रे किंपादिग्रहणाय न स्पृहरस्त्रादिभिरुक्तत्वात् अथवा सोऽत्र स्यादनयत्नेमालि
ति प्रोटिवादेननेयाना नीलादौ व्याख्यानमेवात्फलितं विकल्पमाश्रित्य विषयविशेषाभिप्रायेण कथं
चिद्व्यानेयाः कर्मणि धृतौ कर्मशब्दे कर्मणि उपपदे केरोतेष्टस्यात् धृतौ गम्यमानायां·धृतिश्चेतनं कर्म निर्वेशः
क्रियायाः किंकृत्यापदेयं मत्कादिद्व्याप्ति तियावत्·कर्मकारोऽस्य। न शब्दश्लोककलहगाथावैरचाटसूत्रमं
त्रपदेषु। एषु उपपदेषु करोतेष्टो न स्यात्· हेत्वादिषु प्राप्तः प्रतिषिध्यते·शब्दकारः श्लोककार इत्यादि॥स्तंबश
कृतोरिन्। एमयोः कर्मण्युपपदयोः करोतेरिन्प्रत्ययः स्यात्·व्रीहिवत्सयोरिति वक्तव्यं·स्तंबकरी व्रीहिः
शकृत्करिर्वत्सः। रत्नोतिव्यानक्कुडग्रा पदृष्टकतिस्वरेणाऽन्तरेपरमा धुरान्नं व्रीहि वत्सयोः किं। स्तंबकारः
शकृत्कारः। हरतेर्दृतिनाथयोः पशौ॥ दृतिनाथयोः कर्मणोरुपपदयोः हरतेर्धातोः पशौ कर्तरि इन्प्र
त्ययः स्यात्· दृतिं हरतीति दृतिहरिः नाथेनाथासारम्नेहरतीति नाथहरिः इह प्रत्ययार्थस्य कर्तुः पशुविशे
षणं न तु तस्य बाधकं प्रकृतिप्रत्ययार्थयोरन्वयप्रसंगात्·प्रकृत्यर्थो हि प्रत्ययार्थे विशिनष्टि प्रकृति राम
श्चेद्वधान्तं न रथेश्च क्रिया·साव साधनेन संबंधाहो·पशुश्चक्षुर्वत्तुष्याश्नानीयं वत्कस्वरूपेणावष्टेनव १००

शक्तिमद्रूपेण न तु शक्तिरूपेण। अतः स्तथैव प्रत्याख्यामानः पशुः प्रत्ययार्थो भवितुं नार्हति। अतः कर्त्रैव
प्रत्ययार्थः। तद्विशेषणं च पशुः। सूत्रवाक्यजन्ये बोधे पशुरूपे कर्तरि वाच्ये प्रत्ययो भवतीति हि विषयः। उदाह
रणेषु। पशुरेव विशेष्यः। नत्वाभेदेन संबंधेन कर्त्रा विशेषणं। न च शब्दस्य पशौ परमविशेष्यः पशुस्तस्समुदाय
शक्त्या उपतिष्ठते। एतेन पंचकर्तृशब्दवृत्तयो व्याख्याताः। पंकजनिकर्तृपयसमिति त्रितीनत्र्यार्थः। एवं विधिवा
क्येषु अलसस्तु खाहत्रीः ब्रीहिवत्सयोरित्यादिषु सर्वत्र प्रत्ययार्थविशेषणत्वे। उदाहरणेषु च विशेष्यत्वं च
तमादीनां दृष्टव्यं पशौ किं। इतिहारनाथ हारः। फलेग्रहिः पत्लंभरिश्चाए तौ निपात्येते। फलानि गृह्णातीति फ
लेग्रहिः वृक्षः। स्यादेवंध्यः फलेग्रहिरित्यमरः। भरिकाद्येन्तु फलग्राहिमात्रे इत्युक्तं प्रत्युदाहरणे। फले ग्रहीन द्रुमि
वनस्पतीनामिति। उपपदस्येदंतत्वं इनत्रप्रत्ययश्च ग्रहेर्निपात्यते। आत्मानं बिभर्तीत्यात्मंभरिः आ
त्मशब्दस्योपपदस्य मुमागमः। इन्प्रत्ययश्च पश्च भृञो निपात्यते। चकारोऽत्र अनुक्तसमुच्चयार्थः। इति
वृत्तिः। कुक्षिंभरिः। उदरंभरिः फलशब्दस्य अदन्तत्वमपि निपात्यते। यौवनस्य तीर्णो फलेग्रहिरिति। इदमपि कुक्षिं
भरि वत् चकारेण संग्राह्यमिति हरदत्तः। वाह्यस्त्वात्मोदरकुक्षिषु इति पठंति तथा च मुरारिः। ज्योत्स्नाक
रंभमुदरंभरयश्चकोरा इति। रेवापिवानापिधभृतयोप्यनेन निद्राः। भाष्येतु भृञः। कुक्ष्यात्मनोर्मुम् इत्ये

शारू३ तावदेवास्मिन्नेतद्छंदसि वनसनरक्षिमथां ॥ एभ्यः कर्मण्युपपदे इन् प्रत्ययः स्यात् छंदसि॰वनषणि संभक्तौ॰गाणि
१०१ सह निर्दिष्टो यो वास्त्विको॰स मादेव गृह्यते नतु वनु याचने षणु दाने॰इति तानादिकौ निरनुबंधकत्वात् प्रा
ह्वयाच्च॰ब्रह्मवनिं त्वा क्षत्रवनिं त्वा॰ब्रह्मयवनानि क्षत्रे वनतीति विवक्षायां इन्प्रत्ययांतं हंता हि नीयि
कर्व वनं॰उत नो गोषणिं धियं॰षत्वं दीर्घामादित्वात षत्वं॰गां सनतीति विग्रहः॰ये नो थाना यमरक्षितारो॰चन्व
र त्रौपथि रक्षीयि ये पथां पथिरक्षयः॰पथानं रक्षंतीति वेति विग्रहः॰हवि मेथीनाम भ्यावि वासतां॰ ह
विर्मथंतीति हविर्मथयः तेषां॰एजेः खश्॥ एजृ कंपने अस्मात् ण्यंतात् कर्मण्युपपदे खश् स्यात्॰जं
नमेजयतीति जनमेजयः॥ सूत्रे एजेरिति ण्यंतस्य निर्देशः नतु शुद्धस्येकारः खशः शित्करणात्॰न ह्यस्मा
द्धातु कर्त्वे सति सार्वधातुकस्यादिति॰न च शुद्धस्य शापि सति अपत्ति वा विशेषो स्ति न चोक्त तार्थे शित्व मिति
वाच्यं॰इहार्थत्वे संभवति केवलोच्चारणार्थत्वस्यायुक्तत्वात् शीर्षखशः खित्वं सुमर्थ्यम्॰मुनिध यद स्यादोक्त स्व
त्वार्थं च॰खश प्रकरणे वा तशुनातिलशार्द्धे षु जनधेट् तुदजहातिभ्य उपसंख्यानं॰वातमजाः मृगाः॥ अ
निधयः खित्पनव्ययस्य निखस्वाः तिलंतुदः शर्द्धं जहाः मृगाः॥ अोहा कल्याणी॰जुहोत्यादित्वात् शपः श्लो हित्वं राम
वनं॰अाप्यस्तयोरित्यालोपः॰शब्दो अपापक शर्द्धं तं जहतीति विग्रहः॰माधव स्कश शर्द्धं जहा माषस्य सुदा जहा १०१

दुर्गसिंहोप्येवं · तत्र जङ्घातिरं तेभ्रूविलासपर्थःसाधसिः छिनत्तीति वत् · माषाणां कारकार्त्त्वमिति वा ।नासिका
स्तनयोर्ध्माधेटोः ॥ खशयात् · अत्र यथासंख्यं वा प्रतितं वार्त्तिके स्तनेधेटः ।नासिकायां ध्मश्च · स्तनंधयतीति स्तनं
धयः धेट्ष्टित्वस्य अत्र च वेत्र च रितार्थत्वात् स्तनंधयी · अत्रे वृत्ती विषमते नान्यत्रेति आह । इति हरदत्तः अत्रैव
ति खशप्रत्ययान्तोपलक्षणं · तथा च वृत्ती स्वामी · स्तनंधयीत्यादौ ङी वर्थ इति · वर्द्धमानो पि शुनिंधपी स्तनंध
यी · खश्प्रत्ययान्तएव ङी विति · तेन पाघ्राध्माधेट्दृशः इति शप्रत्यये आतो नुपसर्गे कः इति कप्रत्यये च गावी
क · अत्र मे प्रत्यय एव शरणं · नासिकंधमः पाघ्रेति धमादेशः ।नासिकंधयः ।नाडीमुष्ट्योश्च ॥ एतयोः कर्मण्यु
पपदयोर्ध्माधेटोः खश्स्यात् अत्र यथासंख्यं नेष्यते इति भाष्ये वृत्तौ च स्थितं · यथासंख्यमनुद्देश इति सूत्रे
तु भाष्ये यथासंख्यमसत्तीत्युक्तं · तन्मतभेदेन बोध्यं · नाडिंधमा नाडिंधयः मुष्टिंधमः ।मुष्टिंधयः ।भाष्ये घटी
खारीशरावखुपसंख्यातौ · घटीं घटिंधमः घटिंधयः खारिंधमः ।खारिंधयः ।खारी शब्दः परिमाणवाची ·
खरीतिपाठेनरः खारीगर्दभी · जातिलक्षणो ङीष् । खरिंधमः खरिंधयः । तथा वातपक्त वातशब्दमप्युदाजहा
र · वातंधमः वातंधयः इति · तत्तु भाष्यादौ न दृश्यते ॥ उदि कूले रुजिवहोः ॥ उत्पूर्वाभ्यां रुजिवहिभ्यां कूले क
र्मण्युपपदे खश्स्यात् · कूलमुद्रुजतीति कूलमुद्रुजः । कूलमुद्वहः धातूपसर्गयोः कार्यं स्यात् इति त्वात्

श.वृ.३ वैगतिसमासः पश्चादुपपदसमासः। ननु तत्रोपपदं सप्तमीस्थमित्यत्र तत्र सति प्रत्ययः स्यात् तत्रैव च सप्तमीनि-
१०१ र्दिष्टमुपपदमिति व्याख्यानात् उपपदमित्यनेन प्रत्यय एवाक्षिप्यते तत्रश्च प्रत्यये नैव समासः स्यात् ननु तदर्-
तेन समासमर्थतावधौ प्रत्ययग्रहणे न तदन्तग्रहणस्य दुर्लभत्वादिति चेन्न प्रत्ययमात्रेण सामर्थ्याभावात्तं-
दाविधावपि प्रत्ययग्रहणपरिभाषाप्रवृत्तेः नचैवमपि तदादि नदंतानि समासाद्युपसर्गविशिष्टेन समासा-
नुपपत्तिः कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् नचैवं कृदकृद्ग्रहणामिति निश्रमितव्यं उपपदसं-
ज्ञा मा भूत् सप्तमीभूत इति अत्राभिमा आदिष्वपि प्रवृत्तिसंभवेन कृत्प्रत्ययव्यभिचारित्वेपि उपपदसमासस्य
कृत्प्रत्ययाव्यभिचारात् यत्कार्यं हि कृत्प्रत्ययेन व्यभिचरति तत्र कृद्ग्रहणपरिभाषा प्रवर्तते यथा धातोः
स्वरूपग्रहणे तत्प्रत्यये कार्यपरिभाषा यत्कार्यं धातुना व्यभिचरति तत्र प्रवर्तते अत एव हनस्तृगस्यामित्यत्र
नुदात्तस्य च दुपधस्य अन्यस्यामागमो न प्रवर्तते एतेन गोमंदाय इति व्याख्याने तत्रापि धातुमात्रात्प्रत्यय
णोगति समासे च सगतिकेनोपपदसमासः स्यादित्वात् सप्तमीनिर्दिष्टत्वाविशेषात् कुलस्य च व्र
हस्यापि च उपपदत्वे स्यात् नत्र तत्रोपपदयोः कृ जि वहो यथा सत्यं स्यादिति चेन्न मैवं यत्र हि प्रत्येकमु राम
पपदत्वमिष्टं तत्र सप्तम्यां वसप्तमी सिद्धा रयति न्यायेवात् नाजीमसुप्यौ इति यथा इह तु विपर्ययः कृतः १०१

तस्या उदीति पंचम्याः स्थाने सप्तमी रुजिवहोरिति पंचम्याः स्थाने षष्ठी तेनोक्तार्थलाभः॥ एतच्च यथासंख्यसूत्रे कै
यटे स्पष्टं॥ वहाभ्रे लिहः॥ वहाभ्रयोः कर्मणोरुपपदयोर्लिहः खश् स्यात्॥ वहं लेढीति वहंलिहो गौः॥ लि
ह आस्वादने॥ अदादित्वाल्लुक्॥ खशो ङित्त्वान्न गुणः॥ अभ्रंलिहो वायुः॥ परिमाणे पचः॥ परिमाणे प्रस्थादि
॥ तस्मिन् कर्मण्युपपदे पचेः खश् स्यात्॥ प्रस्थं पचतीति प्रस्थंपचा स्थाली॥ खारिंपचः कटाहः॥ इह सूत्रे परिमाणग्र
तिन स्वरूपग्रहणं तस्य पचिं प्रति कर्मत्वायोगात्॥ अतः तद्विशेषाः प्रस्थादयो गृह्यन्ते॥ न तु प्रियादिपरिमाणा
नि वाच्या एव स्युः नहि विक्लेदनवाचिना सह कर्मत्वासंभव एव अतः परिमितैर्व्रीह्यादिभिर्नैमानाद्यस्याश्रयाः॥
मितनखे च॥ एतयोः कर्मणोः पचेः खश् स्यात्॥ मितंपचा ब्राह्मणी नखंपचा यवागूः पवित्रेतापवनः॥ विधु
रुषोस्तुदः॥ एतयोः कर्मणोरुपपदयोः तुदेर्धातोः खश् स्यात्॥ विधुं तुदतीति विधुंतुदः॥ अरुंतुदः॥ अरुर्हि
षदजन्तस्य मुमिति नकाराल्परो मुम्॥ संयोगान्तस्य लोपः॥ स हि केयो विधुंतुदः प्राणो ह्रियामीर्ममरुः॥ अरुंतु
दस्तु मर्मस्पृक् अरुंतुदः॥ असूर्यललाटयोर्दृशितपोः॥ एतयोः कर्मणोरुपपदयोः यथासंख्यं दृशितपिभ्यां
खश् स्यात्॥ असूर्यमित्यसमर्थसमासः दृशिना नञः संबन्धात्॥ सूर्यं न पश्यन्तीति असूर्यंपश्याः राजदाराः॥
पापाधमे तिपश्या देशः॥ गुप्तिपरं चेदं एवं नाम गुप्ताः यत्परिहार्यदर्शनं सूर्यमपि न पश्यन्तीति॥ नेनसमसपि

शा॰द्व॰३
१०३

सूर्यदर्शनेच योगोन विरुध्यते·यदातु सूर्यदर्शनाभाव मात्रं विवक्षितं तदानञ्समासेन भवितव्यमेव असूर्यंपश्येन·अनभिधानादि
तिन्पासमकारः।उग्रंपश्येरंमदपाणिंधमाश्च।एते निपात्यंते·उग्रमिति क्रियाविशेषणं।तस्मिन्नुपपदे दृशेः खश्
उग्रंपश्यती तिउग्रंपश्यः इरा उदकं तेन माद्यति दीप्यते अविंधनत्वात्·इति इरंमदो मेघज्योतिः·मदी हर्षे·
अस्मादेव निपातनात् दिवादिभ्यः श्यन्न भवति·पाणयो ध्मायंते अस्मिन्निति पाणिंधमो ध्वा·मधुनः
यस्मिन्नगबाह्निः अपाणिद्युपनोदनाय पाणयः शब्द्यंते तादृशः अंधकारप्रायाद्वृत्तो मार्गः।प्रियवशे वदः खच्।
प्रियवश इत्येतयोः कर्मणोरुपपदयोर्वदिधातोः खच् स्यात्·प्रियंवदः।वशंवदः खकारो मुमर्थः।चकार
स्त्वविद्वत्स्वइति विशेषणार्थः इति वृत्तिः·खेऽस्वस्फूव्यमाने एजेः।वशंजनमेजयः·अत्रापि स्यादिति
भवः।ननुएकानुबंधकग्रहणेन व्यनुबंधकस्येति वचनान्न भविष्यति·नचैवमपि कूलातवः कूलीनः प
श्येतिलोपाप्रवृत्तये ङ्खः स्यादिति वाच्यं·प्रकरणाभावात् चयातत ह्वातुप्रत्ययस्ये वग्रहणात् किं च दोषो
णाविति सूत्रात् णाविति नुवर्त्य खेपरेणो ह्रस्वो विधीयते·अतः कूलीनेन दोषः जनमेजय इति केवगतिः
मत्वं·चिंत्य प्रयोजन एवावकारः शप्यानरकरणमुत्तरार्थं हि घंतपरस्यचरूस्वणिलोपो यथास्यातो·दाम
शपथमाभूरिति निवेवमुद्धरेषेव क्रियतामिति चेन्न·मत्वं·इहकरणमस्यतोपि भवतीति तापनार्थं १०३

नञनुपद्दमेव वक्ष्यमाणं वार्त्तिकं गतार्थं· खचप्रकरणो शमेः स्त्वपि· असंज्ञार्थमिदं वार्त्तिकं· संज्ञायां त
वक्ष्यमाणेन गमेश्चेति सूत्रेणैव सिद्धेः इदं च वार्त्तिकं ज्ञापकसिद्धार्थमित्युक्तमितंगमो हस्ती· विहायसो वि
इत्यादि विहायसो विह इत्ययमादेशो वक्तव्यः खच्च डिद्वा वक्तव्यः। विहंगः विहंगमः। डे च· डे· परे विहायसो
विहादेशो वक्तव्यः विहगः· अन्यत्रापि दृश्यत इति डप्रकरणे च वक्ष्यमाणेन डः। द्विषत्परयोस्तापेः। एतयोः
कर्मणोरुपपदयोः तपः खश्स्यात्· तपेरा हेतुर्णिः तप संतापे धातोर्णिः द्वयोरपि ग्रहणं· द्विषंतं तापयती
ति द्विषंतपः· अरुर्द्विषदेति मुम् संयोगांतलोपः· परंतपः· द्विषत्परयोरिति द्वितकारको निर्देशः· तत्र एके
न द्विषच्छब्दो विशेष्यते· नकारांतो यो द्विषच्छब्द इति सोऽवत्वात् तन्निर्देशस्याविशेषणस्य परा निपातः। तेन
स्त्रियां न भवति· घएछीग्रहणे न लिंगविशिष्टपरिभाषायाः अनित्यत्वज्ञापनाद्वा द्विषतीतापः क
र्मण्युपपदे भवति।। वाचि यमो व्रते। वाक्शब्दे कर्मणि वाचि सुपपदे यमः खच्स्यात्· व्रते गम्यमाने· शास्त्रे
णाबोधितः संकल्पविशेषो व्रतं· वाचंय नयतीति वाचंयमः· वाचंयमपुरंदरौ चेति पूर्वपदस्यामंतत्वं
·नचैवं खचप्रत्ययोपि नैव निपात्यतामिति वाच्यं व्रतादन्यत्रापि प्रसंगात्· यदि तु निपातनबलादेव
व्रतविषयताश्रीयते तत्रैव वाव्रतग्रहणं क्रियते· वाचियमो व्रते पुरंदरश्चेति तदा इह वाचियमो व्रत

शब्दकौ२ इतिसूत्रं पूःसर्वयोरित्यत्र पुरिंदारेरित्येशाखुशाकटमकर्त्तुं· चते किं यो हि स्थिरशाकटा स्मिनावाचं पृच्छति तत्रा
१०५ णो वृघथाप्यात्तवाग्यामः। पूः सर्वयोर्दारिसहोः॥ पुरसर्वेऽस्मिन्नयोः कर्मणि॥ ए पदयोः यथासंख्यं दारि
सहोर्धात्वोः खच्स्यात्· पुरं दारयतीति पुरंदरः। वाचंयमपुरंदरौ चेत्यमूम्। सर्वंसहो राजा· इह स्त्रे ह विदार
णाङ्गत्यस्य ग्रहणात्· ननु हृमयेहङ् आदरइत्येतयोरिति उपदेशात् सहिग्रहणमसंज्ञार्थे· संज्ञायां तु भृतृवृ
जीत्यादि विवक्षति· भगं च दारेरिति वक्तव्यमिति काशिका· भाष्यादावदृष्टमपीदं वार्त्तिकेन लभ्यते·
भगं दारयतीति भगंदरः। सर्वकूलाभ्रकरीषेषु कषः॥ एषु चतुर्षु कर्मसूपपदेषु कषेः खच्स्यात्· सर्वंक
षः खलः। कूलंकषा नदी। अभ्रंकषो वायुः। करीषंकषा वात्या। मेघर्तिभयेषु कृञः॥ एषु त्रिषु कर्मसू
पपदेषु करोतेः खच्स्यात्· मेघंकरः। ऋतिंकरः। भयंकरः। उपपदविधौ भयादिग्रहणं तदन्तविधिं प्रयोजयति ।
नीत्यत्र कृतान्तादभयंकरः। क्षेमप्रियमद्रेऽण् च। त्रिषु कर्मसूपपदेषु करोतेरण्स्यात्खच् च· क्षेमंक
रः क्षेमकारः। प्रियंकरः। प्रियकारः। मद्रंकरः। मद्रकारः। वेति वक्तव्ये अण्ग्रहणं हेत्वादिषु टप्रतिषेधार्थं·
कथं तर्हि स्वल्पारंभाः क्षेमकराः इति कर्मणः शेषत्वविवक्षायां पचाद्यच् भविष्यति· छत्रमिति शिवंकर राम
इत्यपि दृश्यते· तथा च श्रुत्यर्थे शिखायां शिव एको ध्येयः शिवंकरः सर्वमन्यत्परित्यज्येति कर्तर्यस्य १०५

पात्सिद्धं । आशिते भुवः करणभावयोः । अत्र तूपपीत्युपतिष्ठतेनेन तत्कर्मणीति भवते रकर्मकत्वात् यद्यपि
सोपसर्गोस्य धातोस्य च भवतेः सकर्मकत्वमस्ति तथापि तत्र खचा न भवितव्यं अनभिधानादित्याहुः
आशितशब्द शुद्धिविधौ त्रयन्ते अशभोजन इत्यस्माद्धातोः पूर्ववद् विचार्यते कर्मणि कर्त्तरि क्तप्रत्ययां
त एकः अशोर्ण्यन्तात् प्रयोज्यकर्मणि क्तस्तस्य ये कृते अपरः आशितः कर्त्ता यो ध्करान्नविधिः प्रकिर्मयो
र्विशिष्टः तत्राद्यस्तीयपयस्य एषभूतपूर्वगत्या कर्मोच्यते प्रत्यवसानार्थानां आणौ कर्त्तुर्णौ कर्मसंज्ञा
विधानात् । कृष्णत्रिफलादस्याशितः कुणपी इत्यत्रापि अथमेव यात्यः अत्र ग्रहादर्शनात् आद्येन तु सोप्रतिकर्म
वकहेतु चे यस्तु धात्वर्गानिष्ठत्यवसानार्थप्रत्ययस्तिभावकर्माधिकरणेषु क्त इत्यनेनाद्य न गत्यर्थेति अनभिधा
नात् स्वार्थिकक आशितः शब्देस्तु च न उपपदमभवनेधानोः करणभावे वार्थे विचरणात् आशितो भवत्यनेन ।
आशितो भवः ओदनः यो वनाओदनेन अनिष्ठ्यादि रिपोजितो भवति स एव मुच्यते भावे आशितस्य भवनं आ
शितंभवः इह वासरूपविधिनाल्युडपि भवति आशितस्य भवनः आशितस्य भवनमिति घञाम बाध्य एक स
रूपत्वादित्याहुः न वा क्तवल्युट्तुमुन् खलर्थेषु वासरूपविधिर्नास्तीति प्रतिषेधः शंक्यः यत्र हि घञाद्योरपवा
द तेन कल्युड् स्वरूपसंक्षे उत्सर्गं नित्यं बाधते न तु विकल्पेनेति न एकार्थः इह तु ल्युट् अपवादो यावच्चन तत्र वासरू

शब्दकौ पन्यायो निर्बाध एव॰ आशितम्भवनमित्युदाहरतो जयादित्यस्य संमतमेवेति दिक्॥ संज्ञायां भृतृवृजिधारि
१०५ सहितपिदमः॥ भृतम्भृतिम्पोषम्पाः यथायोगं कर्मणि॥ एभ्यो वर्तते चोपपदे खच् स्यात् नाम्नि संज्ञायां॰ विश्वं बिभर्त्ती
ति विश्वंभरः॰ केटभजित॰ रमा विश्वंभरा॰ पाछिरा रथंतरं साम॰ रथेन तरतीति व्युत्पत्तिमात्रे स्वरसंस्कारावयुत्पा
दिसिद्धार्थं॰ न त्वत्रावयवार्थोनुगम्योस्ति॰ रथंतरमाजमार्गवसिष्ठ इत्यत्र हि रथंतरामित्यवग्रहः हलन्तेति॰ अंतोदा
त्तत्वं बाधीयते॰ अवं इत्येतत्तु अवग्रहो न स्यात्॰ न हि विषयस्य पाककराहस्यात्॰ पतिंवरा कन्या॰ शत्रुंजयो
हस्ती॰ युगंधरः पर्वतः॰ शत्रुंसहः॰ शत्रुंतपः॰ अरिंदमः॰ अंतर्भावितण्यर्थोत्र दमिः॥ संज्ञायां किं॰ कुटुंबं बिभर्ति
इति कुटुंबभारः॥ गमश्च॥ अस्मात् खच् स्यात् कर्मण्युपपदे संज्ञायां॰ सुतंगमः॥ छंदस्यत्र एव गमिनोक्तः॰ अ
न्तर्हत्वेगमेरेव अतद्वन्निर्देशात् स्यात्॰ पृतृप्रभृतीनां मा भूदिति॥ अंतात्यंताध्वदूरपारसर्वानंतेषु डः॥ संज्ञा
यामिति निवृत्तं॰ एभ्यस्स्व कर्मस्वपपदेषु गमेर्डः स्यात्॰ अंतगः॰ अत्यंतगः॰ अध्वगः॰ दूरगः॰ पार
गः॰ सर्वगः॰ अनंतगः॥ डित्वसामर्थ्यादभस्यापि टेर्लोपः॰ सर्वत्रपन्नयोरुपसंख्यानं॰ सर्वत्रगः॰ पन्नं पतितं गच्छ
तीति पन्नगः॰ पन्नमिति क्रियाविशेषणं वद्यते॥ क्वांते॥ उरसो लोपश्च॰ उरसा गच्छतीत्युरगः॰ सुदुरोरधिकरणे॰ राम
सुखेनागच्छत्यत्रेति सुगः॰ दुर्गः॰ कर्मणि तु खलेव॰ सुगमः॰ दुर्गमः॥ निरो देशे॥ निर्गो देशः॰ अन्यत्रापि दृश्यत इ १०५

वक्तव्ये॰ ग्रामघ्नः गुरुतल्पगः॥ आशिषि हनः॥ कर्मण्युपपदे हंतेर्धातोर्डुः स्यात् आशिषि गम्यमानायां शत्रुं व
ध्यात् शत्रुहा आशिषि किं शत्रुघातः अत्र वार्त्तिकानि॥ दारावाहनोऽणंतस्य च टः संज्ञायां॥ दारावितिशब्दोप
न्नायां उपलिंगिना॰ दामशब्देउपपदे आङ् पूर्वाद्धंतेरण्प्रत्ययः तस्य च टकारादेशो वक्तव्य इत्यर्थः टविधानार्थमि
दं आणंतु कर्मण्यणित्येवसिद्धं॰ अंतग्रहणं स्पष्टार्थं अलोपस्येत्येवसिद्धे अन्यथा हि टः प्रत्ययः संभाव्ये
त॰ गोधाकालकादार्वाघाटस्तेषु नस्यतीनां॰ चारौ वा॥ चारुशब्दे उपपदेऽपि गुर्क्कं वा वक्तव्यमित्यर्थः॥ चाबा
घातः॥ वा चोघातः॥ कर्मणि समि च॰ कर्मण्युपपदे संपूर्वाद्धंतेरणंतस्य च टो वा वक्तव्यः॥ वाणान्संहंति
तीति संघाटश्चणिसंघातः॥ पक्षसंघाटः पक्षसंघातः॥ अपे क्लेशतमसोः॥ अपपूर्वाद्धंतेर्डः स्यात् क्लेशतमसोः
कर्मणोरुपपदयोः॥ क्लेशापहः॰ पुत्रः॰ तमोपहः सूर्यः॥ अनाशिष्यर्थोऽयमारंभः॥ कुमारशीर्षयोर्णिनिः॥ एतयोः क
र्मणोरुपपदयोः हंतेर्णिनिः स्यात्॰ कुमारघाती॰ शीर्षघाती॰ सुप्यजातावित्येवमादिभिः सिद्धे ताच्छील्याद्यप
कार्थमारंभोऽपि किंच हो पिपथाम्पा हित्येवमर्थं॰ शिरसः शीर्षभावार्थं च वचनं॥ लक्षणे जायापत्योष्टक्॥ हं
तेर्डुतिः जायापत्योः कर्मणोरुपपदयोर्लक्षणवति कर्त्तरि टक् प्रत्ययः स्यात् जायाघ्नो ब्राह्मणः पति
घ्नी वृषली॰ सुलक्षणाशरः॰ अशशुभ्रश्च सत्पयाताः नन्त्वकेवलः स्वत्वमेव सामर्थ्यान्न॰ केवले हि जस

शा॰वृ॰३ लक्षणोतिलकरोवा विशेषादौकर्तृत्वेन विवक्षिते॰ अत्र रक्षत्वे गोचमिद्धः पत्यघ्नः तस्माद्घ्नप्रति लक्षणादिजा
१०६ यामरणनिमित्तमस्तिमतीहंतीतिगौणोवादः एवंपतिघ्नीत्यत्रापि॰ ।अमनुष्यकर्तृकेच॥ मनुष्यभिन्न
कर्तृकेर्थे वर्तमानाद्धंतेः कर्मण्युपपदे टक्स्यात्‌ जायाघ्नः तिलकालकः पतिघ्नी पाणिरेखा॰ पित्त
घ्नं घृतं अमनुष्यकर्तृके किं इति किं आखुघातः शूद्रः यद्यपि अमनुष्यशब्दो रक्षःपिशाचादिषु रूढ
स्तथापितस्यानुरोधिनोव्याख्यानान्मनुष्यादन्यत्सर्वमेवाहानतु पूर्वसूत्रे लक्षणाय हणायथा
प्रत्ययार्थविशेषणं॰ तथा इहापि अमनुष्यग्रहणमस्तु॰ किं कर्तृग्रहणेनेति चेत्‌॰ मैवं॰ अमनुष्य इ
ति ह्यसमानेनोपपदत्वं विज्ञायेत॰ पूर्वसूत्रेतु उपपदान्तरमत्वा प्रत्ययार्थविशेषणानीति गृह्यत
इति विशेषम्पातः अथ कथं कृतघ्नो नास्ति निष्कृतिः बलभद्रः प्रलंबघ्नः शत्रुघ्न इत्यादि॰ मूलविभुजा
दित्वाद्द्रष्टव्याः कथं तर्हि चौरघातो नगरघातो हस्तीति॰ बाकुलकादणितिहरितिभाष्ये ॥ शक्तौहस्ति
कपाटयोः शक्तौ वाच्यमानायां हस्तिकपाटयोः कर्मणोरुपपदयोः हंतेर्हंतोष्टकस्यात्‌॰ मनुष्यक
र्तृकार्थ आरंभः हस्तिघ्नो मनुष्यः कपाटघ्नश्चौरः शक्ताविति किं विषेण हस्तिनं हंतीति हस्तिघातः एव
यद्यपीह शक्तिरस्ति अशक्तस्य कर्तृत्वानुपपत्तेः तथापि शक्तिग्रहणसामर्थ्यात्प्रकर्षविज्ञानं ते ९६

न स्वबलेनैव हंतुं या शक्तिः सामर्थ्यं तेन। एवं चोदाहरणेपि हस्तिघ्नं हंतु माधावधीत सामर्थ्यातिशयमा
त्रात् हस्तिघ्नत्वाघ्नत्यते। कुशिरः पाट्यति कपाटं। कवाटमिति पाठे तु अट ते। पूर्वाद्यवत्। कर्ववोघ्न
इत्यत्र योगविभागात्कः। कचादेशः इति हरदत्तः। पाणिघताडघौ शिल्पिनि। एतौ निपात्येते शिल्पि
नि कर्त्तरि वाच्ये। पाणिताडइत्यनयोरुपपदयोर्हंतेर्टक् तोष्टक प्रत्ययः तस्मिंश्च टिलोपः घत्वं च नि
पात्यते। पाणिघः ताडघः शिल्पिनीति किं पाणिघातः ताडघातः। राजघ उपसंख्यानं राज्ञानं हंति
इति राजघः। आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्। आढ्यादिषु
द्याद्येषु अच्व्यंतेषु सुप्सूपपदेषु कृञो धातोः ख्युन्प्रत्ययः करणे वैकल्पिकत्वात् हि विधाय अ
थो आद्यो द्यः च्व्यंता अच्व्यंता अभूततद्भावेऽच्व्यंताः परस्मैपदे अनाढ्यमाढ्यं कुर्वंत्यनेन आढ्यंकरणं। सु
भगंकरणमित्यादि। च्व्यर्थेष्विति किं। आढ्यं तैलेन कुर्वंति। अभ्यंजयंतीत्यर्थः। अनेकार्थत्वाद्धातू
नां तेन न नात्र प्रागनाढ्यः सन्नाढ्यः क्रियत इति अभूततद्भावाभावः। अस्त्यत्वाभूततद्भावः तथा
पि प्रकृतेरविवक्षायां उत्तरत्राहृत्यं प्रकृतिविपरिणामिनीत्वेन यदा विवक्ष्यते यथा अपदा
ल तव पद्मो भवति इति न तत्र विप्रत्ययः तथा च न च वार्त्तिके प्रकृतिविवक्षाग्रहणं चेति अच्वावि ति

श।द३ किं श्याद्वीकरोत्यनेन· स्यादेतत्· करणाधिकरणयोश्चेति ल्युटा भवितव्यं· न च ल्युटः खुनश्चेह विशेषो
१०७ स्ति· उभयथापि हि श्याद्वीकरणमित्येव रूपं· खित्यनव्ययस्य अरुर्द्विषदजन्तस्य मुम् इति रूस्य मु
मावनव्ययस्य विधीयते· घोनतथाप्ये ऊर्यादिच्विडाचश्चेति निपातत्वात्· न च खलु निमित्त उपपद
मतिङिति नित्यसमासो लभ्यते ल्युटि तु नेति वाच्यं ल्युट्यपि गतिसमासस्य संभवात्· तस्यापि नित्य
समासत्वाविशेषात्· न च स्त्री प्रत्यये विशेषः उभयत्रापि ङीब्भवति· ल्युटि टिड्ढाणञ इति ङीबे
ण· खुनि तु नञ्त्ये न ख्युनेत उपसंख्यानेन· न च स्वरे विशेषः· ल्युटि हि लित्स्वरेण कृञ्जेञ्ला तत्कः ख्यु
न्यपि नित्स्वरेण तथैवेति· तस्माद्द्वावितिप्रश्नेमितिवेत्· सत्यं· अन्तरार्थेन द्रुक्रमिति प्राप्यकार:
एवं खआद्याकरणमित्यादिरूपं ल्युणा भवत्येवेति भावः इति कैयटः· यत्तु जयादित्येनोक्तं प्रतिषे
धसामर्थ्याल्लुट्खुनि असति ल्युडपि न भवति· तेन ल्युडपि अयमर्थः प्रतिषेध इति· तस्यायमा
शयः· केवलोत्तरार्थत्वेन बाधाविति प्राप्तात् इहकरणसामर्थ्यात्तु ल्युडपि न यथा इको विधि
भक्ताविति ग्रहणस्य ग्रणार्थत्वे सत्यपि इहकरणसामर्थ्यात् न लुमतेत्यस्य अनित्यत्वयाता राम
प्यनङ् इति अभिप्रायेण इहहकिं चित्तयोश्नीतिवदति· न थावग परार्थेन तापिकासमस्तकनत्व १०९

केवलोत्तरार्थत्वेनेति· भाष्यवार्त्तिकस्वरसेन तु केवलोत्तरार्थत्वं लभ्यते· अत एव द्विरो धात वृत्तिकृत्सूत
मपुष्कलमिति कैयटः· कर्त्तरि भुवः खिष्णुच्खुकञौ· आढ्यादिषु च्व्यर्थेषु अच्व्यर्थेषु तेषु सर्वेषु उपपदेषु
भवतेर्धातोः कर्त्तरि खिष्णुच्खुकञौ स्तः· आढ्यंभविष्णुः आढ्यंभावुकः· सुभगंभविष्णुः सुभगंभा
वुकः इत्यादि· कर्तृग्रहणं करणानुवृत्तिभ्रमनिवृत्त्यर्थं· उत्तरार्थं च· खकारो मुमर्थः· ञकारो वृद्ध्यर्थः·
स्यादेतत्· खिष्णुच इकारो मास्तु· खष्णुरित्यस्तु वेदति वीच्यतां· नन्वागमार्थः· स्वरार्थश्चकारो नक
र्त्तव्यः· प्रत्ययस्वरेणैवाभिमतसिद्धेः· कथं तर्हि इकारादित्वमिति चेत्· इडागमेनेति गृहाण· न च एका
च उपदेशे इति इण्निषेधः· भवते रूढत्वाभावात्· अत्रो भाष्यवार्त्तिककारावाह· न जस्कस्वरसिध्यर्थमिकारा
दित्वमिष्णुच· इतिनजर इति पंचमीनिर्देशात्· खिष्णुजंतस्य स्वरसिध्यर्थमित्यर्थः· यद्ययमिकारा
दिर्न क्रियेत ततः स्वरूपे पि इ द्धिरूपोके स्थाद्यो वोट्यष्ठो इति सूत्रे अस्य ग्रहणं न स्यात् अस्य चकारानु
बंधाभावात्· अथोच्येत अयमपि चितस्वर एव भवति· एवमपि पालाशादित्वाद् च त्वसोत्वं योर इति इ
त्वा दिष्णुज इति रूपाभावा वा न ग्रहणं न स्यादेव नन्न इकारादित्वं क्रियते· अत्र इदं वक्तव्यं· मत्यपीकारादि
त्वे तदनुबंधकग्रहणे नातदनुबंधकस्येति परिभाषया अलंकृञादीष्णुच एव ग्रहणं न भाष्ये

शाद्द३ र्थं नास्य॰ अथो येन रु कारोच्चारणमात्रमर्थादस्यापि ग्रहणमिति॰ हंते वं॰ खस्मजयमस्तज्जत्रे टिकृते चकारानुकृ
१०८ ध सामर्थ्यादस्यापि ग्रहणान्नहि विनिकि मिकारेण॰ तस्मान्न विंत्यमेतत् यत्तु हरदत्तेन षत्वहासात्व योः करणा
स्पो विनतत्यासामर्थ्यायेणादिति रिक्ता। स्पर्शोनुदकेक्विना अनुदके स्विपेतनुप पदेस्पृशः क्विन् स्यात्॰
यद्यपि स्पृशः सकर्मकत्वात् कर्मण्युपपदउत्वेवप्राप्ते तथापि सर्वस्वत्वात्कर्तरीत्यनुदहन्तेः स्वपीत्येवोप
दं निर्णीयते॰ तथाहि कर्तेरिह्हरित्येव कर्त्तरि क्विनः सिद्धत्वात्कर्त्तर्तानुवृत्तिः कर्त्तृस्वयार्थः कर्मण्युप
पदेस्पृकः कर्त्ताकरणादौ वस्त्रपरस्त्वेवं कर्तृप्रचयः तथा वस्तुर्वेतेनुपपदे इति फलितं भवति॰ घृतेस्पृ
शतीति घृतस्पृक्॰ मंत्रेणस्पृशतीति मंत्रस्पृक्उतिप्रोक्तः वस्कतस्क सर्वस्वेकर्तृग्रहणं स्पष्टमेव॰ न हि
न नत्रैव करणानुवृत्तिनिराशार्थं॰ अस्वगितत्वादेवतन्निवृत्तेः नापीह कर्तृग्रपंचार्थं मंत्रस्पृगित्यादेर्ह्विक्वि
पापि सिद्धेः नचाक्विपि कृत्वेन स्यादिति वाच्यं॰ क्विनप्रत्ययो यस्मात्तस्यान्यत्रापि कुत्वमितिवक्ष्यमाण
त्वात्॰ अन्यथा स्पृगित्याद्यसिद्धेरिति अचचेयं॰ अनुदक इति किं॰ उदकस्पर्शः नचेह क्विपा उदकस्पृगि
ति रूपे इवारमितिवाच्यं॰ अनुदक इति पर्युदासमामर्थ्यान्नक्विपोप्यप्रवृत्तेः कथं तर्हि मंत्रस्पृगित्यादेः राम
क्विपासिद्धिरुदकेवेति उदके क्विपोऽप्रवृत्तावपि मंत्रादिकृपपदे तत्र बाधकाभावादिति रिक्ता क्वि १०८

नः ककारो गुणवृद्धिप्रतिषेधार्थः इकारो वेरपृक्तस्येति विशेषणार्थः नकारस्तु प्रत्ययपिनाफवान्तार्थः प
कादुष्पः क्विनो विधानात् तनत्वधात्तुस्वरेणो वसिद्धो यस्कृअने कावरधीणितितत्रांतोरीतस्य वद्धमाणाणा
तनथापि क्विन्प्रत्ययस्य कुरिति विशेषणार्थः क्विप्रत्ययस्य तु व्यमाने हि सुदेशास्यात् कोः क्वियो वानिर्दे
शइतिनचक्के निर्देशे एकः पकारः क्विपलहावितिविशेषः कोपि निर्देशेपकारस्य अनविचेति द्विर्व
चनोपपन्नेः नचैवं क्विविपकारत्वयमितिवाच्यं म्रोन्हीतिसजोपपत्तेः व्यंजनमकारस्यएकस्य अने
कस्य वा रच्चारणोविशेषानुपलब्धाः ऋत्विक् दधृक् स्रग् दिक् उष्णिक् अंचु युजि क्रुंचां चा आद्याः पंच
क्विन्नन्तो निपात्यंतेः ननक्विन्पः क्विन्विधीयतेः तत्रापि निपातनेः महनिर्देशात् क्विविरलादृतोऽक
मस्ति न यथा अवेः ऋक् पर्यन्तात् मेएपेवशाः ऋत्वनमात्रे विधीयते तत्रापिनिपातनो महनिर्दे
शाः युजि क्रुंच्यिप्यो तु केवलाभ्यामेव युजेर्विधानसामर्थ्यांच न हिसोपपदात् जो क्विनि क्विपा
विशेषोस्ति कुत्वस्य चोः कुरित्यनेनैव सिद्धत्वात् अनुपपदेत्वयुजेः समासः तिनुमिन्ननकारस्य
कुत्वार्थं क्विनो विधानं भवति सार्थः कुंच्येर्नलोपाभावश्च निपात्यते ऋतौ यजति ऋत्विक् उ
दूकृत्वशरो उपपदे यजेः क्विन् जिधृषाः प्रागल्भ्ये अस्य क्विन् द्विर्वचनमंतोदात्तत्वं च निपात्य.

श२३ ते दधृक् स्रजेः कर्मणि क्विन् अमागमश्च निपात्यते । सृज्यन्ते इति स्रक् दिशेः कर्मणि क्विन् । दिश्य
१०९ ते इति दिक् । उत्पूर्वात् ष्णिहेः क्विन् उपसर्गान्तलोपः षस्य षत्वं च । उष्णिक् । प्राङ् । प्रत्यङ् । युङ् । युञ्जौ
युञ्जः । सोपपदात्तु समस्ते द्विषि ति किपि अश्वयुक् इति तु निपातनमादच्यात् सोपपदात् तु उप
दाद्युञ्जेः क्विन् भवतीत्युच्यते । न दामसत्सु द्विषे ति सूत्रे युजिग्रहणांश रूपम कर्त्तुं क्रुञ्च क्रुञ्चं च कौ ति
ल्पाल्पीभावयोः नोपधा विभो । नथा च निक्रुचिति रित्पत्र न लोपो दृश्यते । सन्निपातपरिभाषायां
फला निपातनवार्त्तिककारेण्याहुं उपधत्वम कित्वस्य निकुवि नइति । नकारस्य कथं क्रुरिति तुत्वेन ।
तस्यासिद्धत्वात् चौः कुरिति कुत्वं न । अकारोपगतानां तु क्रुञ्चौ क्रुञ्च इत्यादौ षा सं कुत्वं प्राङ् क्लीनिर
वना तवार्यते । प्राङि ति प्रत्याहारः समनशब्दादारभ्य महिङो ऽकारात । अत्र क्षे चित् कुं चिरे क एव धा
तुः नस्य ककारात्परो रेफो पि क्विन्प्रत्ययोगेन निपात्यते आ ऊ चौः कुरिति सूत्रे वामनकाशिकायां स्प
एमे न तन । तादृशः यादृशः कञो जकारो विशेषणार्थः । उकट्प्रत्ययान्ते ति त्यच्छ पाठे क्षु अनालोचने कि
त स्य श्य तीति तदृशः । तादृश्यदयः स्त्रूच्छिताः । ते च अध्यनाप्य व्ययवार्थे निस्स्पाद्यते । अत एव अना एम
लोचनरूपत्वेन दृश्यर्थाभावे हि अयं विधिः स्यादिति दृश्यार्थे अणे न भवतीतिभावः । भाष्ये तु कर्मक १०९

कर्त्तरि सुत्पत्तिर्दर्शिता॰ न मिवेद्ये पश्यंतिजना॰ सद्य्वाग्रे पश्यंति ज्ञानविषयो भवतीत्यर्थात् तत्र था हृक
हृञः इत्यार्थे तिङ्क्तिन प्रत्यया एवेत्यपि पक्षांतरे किंतु भाष्ये तत्र टि द्वा णाजि ति हृत्र्त्रे सुत्पादयिष्या
मः स मा नाम्पयो ष्येतिवक्तव्यं॰ स हृक् महृशः अन्या हृक् अन्यादृशः कर्तोपि वक्तव्यः तादृशः स मत्व
द्विषदुहदुहदयुजविदभिदछिदाजिनीराजामुपसर्गे विक्किप्। सपीतिवर्ज्जेते॰ कर्मग्रहणात्तु स्पृशो
नुदके उ स्पृनः प्रभृतिनानुवर्त्तते॰ तत्रत्यनुहतेन कर्त्त प्रत्ययार्थेन कर्तृग्रहणेन नत्रि वृत्ति रित्युक्त
कर्तृग्रहणाद्धत्याख्याने त्वस्मात्या नादेव कर्मग्रहणाभिवृत्तिरित्यपरदेन त॰ सहा हिम्पो धात्वभ्या
सपि उपसर्गेपि उपपदे क्विप् स्यात॰ उपसर्गग्रहणं ज्ञापनार्थं॰ सुपिस्थः इत्यतः प्रकृतस्य सुपग्रह
णास्य उपसर्गे न स्पृत्वमिति सुक्तं प्रात्वमिति युक्तंचेनत॰ विशेषणेत्रिधौ आस्रातस्य सामान्यश
वृस्य तदसिद्धिप्रात्त्वोवित्यात॰ तत्फलं तु स्पृशोनुदके क्विन् इत्यत्र उपसर्गस्या ग्रहणमिति केयत
यत्तु सामान्यापेक्षं ज्ञापकमाश्रित्य नदः सुपिस्थ एवेत्यत्राप्युपसर्गे निरपात्व मुक्तं भाष्य पक्षत्पो तत्त
मदस्पोजनं॰ न त्रप्रत्यभाष्ये गदस्म हृत्वाय मत्र्त्रेति सूत्रादनुपसर्गग्रहणमनुवर्त्तते इति सिद्धांतितत्वा
त॰ चमत्कृत स्मृक्तेमृत्येनोक्तं फलं चिंत्यमेव॰ स्पृशो उपसर्गे क्विन भावेपि छियोर्वीरत्वात॰ न त्र च क्विन

शद्३ क्रियोः स्वरे रूपे वा विशेषस्य दुर्लभत्वात्· अथवा भृत्यभिधानेय इ· लुगं तस्य नेकाच्कत्वेन स्वरे विषे
११· षीव गौनीयइत्यां स्त्री नावत्· ईक्षः सुविषत्· पूर्वे परादिति षत्वं· तत्र छंदसीति षत्वे ते· नेतभावाद्यो
सुविषात्विं वभवति॥ तथा च माघः मनः सुधनक्ष मसोन्मुखीयतेति· अरितेयादिविषद्रूपस्य
त्युस्तुषामाद्दिपाठात्स्य त्वमिति माघवः· उपनिषत्· सन्ति प्रतेरिति षत्वं· सुद् निष्ठिषामाद्दीवयाति स्व
नादात्स्विकस्य ग्रहणं· न तु स्तुवति सुष्तयोः अंगुष्ठः प्रष्ठः पितृष्विट्टः प्रष्टिट· मित्रध्रुक मध्रुक· गोधु
क्· प्रधुक् युजिरयोगे· युज समाधौ· द्वयोरपि ग्रहणं· अश्वयुक् पशुक् विदज्ञाने विदविचारणे वि
दसत्तायां द्वयाणामपि ग्रहणं तत्र लाभार्थस्य विदेः अकारस्येति बहितन्वात्· वेदवित्· प्रविनः काष्ठभि
त्· प्रमित्· रज्जुछिन्· पष्ठित्· शत्रुजित्· अजित्· सेनानीः ग्रामणीः उपसर्गात्समासे पीतिणत्वं· ग्रामणी
ग्रामण्यौ ग्रामण्यः अकृतापकात्ताणत्वं· सप्तग्रामणीरिति निर्दिष्टो रिपूर्वपदस्थात् त्रिमित्राद्यनात्स्पुनयतेने
कारस्य असंज्ञायामपि णत्वं स्यादपिति· नीरूपविषयं ज्ञापकं· तेन ग्रामं नायकः इत्यत्र कृदंतस्य णत्व
णत्वं न· ज्ञापकस्य सामान्यापेक्षत्वात् दयशब्दाद् पिण्त्वं· न च वृत्तमादिशादेश्यापि प्राप्नोतीति चेत्· इत्यस्य
ष्ठापनेरित्येके· अग्रग्रामाभ्यां नयतेरिति वचनान्ज्ञापनमयिनुप पदइत्थमात्रविषयं नीरूपमा ११·

त्रविषयनान्तु वचनस्योपधवघेयाद्रूप्रमे·स्वराड्विराट्·सम्राट्·भोगजीनिमत्वं·इह युजि ग्रहणांशकय
मकत्वेमिनिश्चाल्लिदृश्कृणिनिसूत्रे एवावोचाम·अथ जयादिस्पेः अन्येभ्योपिदृश्यन्ते इति सामान्येन
क्विबस्पनेनस्पेयाये प्रपंचइति·न चैनेन दृष्टग्रहणंत·नस्पतांबीलिकत्वात्क्षितिचेत·सत्यं क्विप्वेति सूत्रापि
ह्यविवक्षित·नचापि हि विजयै·छंदसि आतोमनिनक्वनिश्चनिपश्च अन्येभ्योपिदृश्यन्ते तिइन्द्रसंनि
हितं न दृशि ग्रहणां अनुवर्त्स्य वचनपरिणामेन क्विप्यात्तु शक्यत इति आशयेन अन्यत्रा दृत नयादि
त्पग्रेश्यप्रभृतेः एतेनाहुः कथं निस्त्रे क्विपपिहः अन्येभ्योपिदृश्यन्तइनीति भाष्यं तन्त्वप्रशमि
ष्टेत्सुमयम प्रियाप्यो तेऽत्र वेदमवधेयं सूत्रस्य प्रपंचार्थत्वे स्थिरे सूविदंत्पत्तधातुविशेषप
ाग्रहेद्वलि ~ नोपपत्तौ निष्फलं सूचनिस्यत्यापिविस्तिषु क्विप्चेति क्विपोऽपुच्चोरत्वात्·न चेह
धातुविशेषग्रहणं नियमार्थं·तेन सूचपात्रिषु क्विप्चेति सूत्रेन प्रवर्त्तेत इति वाच्यं·प्रपंचार्थ
मिदंसूत्रमिति सूत्रोक्ति विरोधात्·किंच लुग्विकरणालुग्विकरणयोरिति परिभाषयाप्युवतिस्थ
वस्यारेवमहणंन्याय्यं·माहवयोमात्र पुरस्कारेव·अन्यत्राणाद्यो काकारवाड्यत्रस्तिरेः सा हव
चर्यमुपेसकथ्यविदंत्सकाविवसोऽक·कथं वा पुरंजेऽपि उभयग्रहणमवोचे·नाहि सुनाविर

श॰र॰३ दयो रात्रावपि वैषम्यमपि॰ तस्मादिहन्त्रिकृतां तदनुगामिनानन्योपाधात्तविशेषपरिग्रहेत्राभिनिवेशो नि
१११ र्मूलो निष्फलश्च॰ ननु अयं वत्वा कृत्वा सूत्रमर्थोऽत्र त्याख्यातं॰ तथा च सुप्युपग्रहणे उपसर्गे निहन्त्रिनत्राथेति
त॰ पाशापि॰ तत्फलस्य प्रागेवाशिथिलीकृतत्वात्॰ एवं वत्तिनि विधौ उपसर्गग्रहणमपि वक्तव्यमिति
दिक्॥ भज ण्विः॥ सुप्युपसर्गे च उपपदे भजेर्धातोश्छंदसि ण्विप्रत्ययः स्यात्॰ अर्द्धभाक् प्रभाक्॥ छंदसि-
सहः॥ सुपि उपपदे सहेर्धातोश्छंदसि ण्विप्रत्ययः स्यात्॰ उग्रं वनः पृतनाषाट् पालयध्वः॰ अमी
दमेकमेको अमित्रिषाट्॰ कथं तर्हि तुराषाहं पुरोधाय॰ धराषाट्पाहिमदर्थ्यायां वेत्यादि॰ छंदसी
त्युक्ते भाषायां ण्विप्रत्ययानुपपत्तेरिति चेत्॰ चित्यमिति हरदत्तः॥ सहतेरपि भवाद्योतनिष्ठत्त्वे वष
णात् पाञ्छतिर्यतिविद्भिर्विवोऽस्यतरइतिवा समाधेयं॥ वहश्च॥ वहतेर्धातोः सुप्युपसर्गे च उपप
देवं छंदसि विषये ण्विः स्यात्॰ दित्यवाङ्गमे दित्यौही च मे॰ योगविभाग उत्तरार्थः॥ कव्यपुरीषपुरीष्येषु
ञ्युट्॥ एषूपपदेषु छंदसि वहेर्ञ्युट् स्यात्॰ कव्यवाहनः॰ पितॄणां पुरीषवाहनः॰ पुरीष्यवाहनः॥ ह
व्येऽनंतःपादं॥ हव्यशब्दे उपपदे छंदसि वहेर्ञ्युट् स्यात् पादावंते अग्निश्च हव्यवाहनं॰ पादमध्ये त्वे एष
हव्येति छिरिच॰ हव्यवालग्निः॰ पितॄनां॥ जनसनखनक्रमगमो विट्॥ उपसर्गेऽपि च उपपदे १११

छंदसि विकल्पः स्यात्· चेरुक्तस्येत्यादौ सामान्यग्रहणाविघातार्थं कः॥ विड्वनोरित्यादौ विशिष
ष्टार्थं श्रु· जनजननं· जनीप्रादुर्भावे· द्वयोर्ग्रहणं· अज्ञा॥ जोजा॥ षणु दाने· षणु सम्भक्तौ· द्वयोरपि ग्रहणं· ग
षा इंदोन्त्यः· अप्सु सावा जसा जन इत्युपधे मिविषपत्वो इत्या इत्यादिजनत्· आद्दधिक्राः॥ शव सा पंच छूषी॥
अग्निमुषपपर्षिनादधिक्राः· ता॥ स्यो अग्रेगाः॥ उदाहरणे विड्वनोरनुनासिकस्यात् इति· आत्वं गोषाव
षा इत्यत्र सनीतेरन इति षत्वं· अग्रेगा इति समस्या अलुक्॥ अग्रेनत्रो छंदसीति निवृत्तं· अत्रापि वेस्व
पि उपपदे अदेर्विरस्यात्· आममति आपात् सस्यात्· अत्रे नेति· अन्नाद् भाषायां क्रमेणप्रणाः· छंदसि
तु अस्य शस्य ये न पचो यविस्तु छन्दः· तेन अन्नाद इत्यत्र अद इति अणुवग्रहः सिध्यति· क्व्यपेच· क्वपा
रे उपपदे अदे धातोर्विरस्यात्· क्रव्य अतिक्रव्यात्· पूर्वेणैव सिद्धे वचन पमरूपवाधनार्थं· तेन अ
णननभवति कथं तर्हि क्रव्यादः अय आशाइत्यमूः अत्र· हां क्रव्यविक्रत्त पक्व मांस शब्द उपपदे अ
ण· न स्य च पृषोदरादित्वात् क्रव्यभावइति अस्यार्थः क्रव्यं विकृत्तं न तु देववनाः विशेषनः क्रव्यं· एवं का
लेति समासः तस्य च क्रव शब्देन पुनः स एव समासः ततो मांस शब्देन पुन विशेषणसमासः तस्य
क्रव्यादेशः न चैवं क्रव्याद इति रूपस्याव जैनीयत्वात्तया किंवा सरूपवाधनार्थेनानेन वचनेन·

श२२३ वार्त्तिकविरोधश्च । यदाह । अदीनत्वेकं यथा युष्माकं वा सरूपनिवृत्त्यर्थमिति इति चेत् मैवं । अर्थभेदाद्
११२ भयसाधत्वोपपत्तेः । आममोममस्तु को हि क्रियात् । विशिष्टप्रक्रमस्तु क्रियादिति । दुहेकच्
। दुहेः स्वसुपपदे कप्रत्ययात् घश्चान्तादेशः । कामदुधा धेनुः ॥ मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ॥
श्वेतादिषूपपदेषु वहादिभ्यो धातुभ्यो ण्विन् प्रत्ययः स्यात् मन्त्रे धातूपपदसमुदायाश्च निपात्य
ते । अलाक्षणिककार्यार्थं प्रत्ययस्तु विधीयते । श्वेतशब्दे कर्त्तृवाचिन्युपपदे वहेर्धातोः कर्मणि का
रके ण्विन्प्रत्ययो भवति । श्वेताः एनं वहन्तीति श्वेतवाः इन्द्रः तेषु च तथा हेत्वक्थे कर्मणि करणे चोपपदे शा
सतेः प्रत्ययः नलोपश्च । उक्थानि उक्थैर्वा शंसतीति उक्थशाः यजमानः उक्थशासौ उक्थशासः
दाशृदाने । अस्य पास पूर्वस्य आदेर्त्वे कर्मणि च प्रत्ययः पुरः दाश्यते पुरोडाः शः श्वेतवाहादी
नोजस्पदस्येति वक्तव्यं । यत्र जस्तत्पद्त्वम विष्यतिनत्र ण्विनो यथा दोजस्प्रत्ययो वक्ष्यम
इत्यर्थः नतश्च श्वेतवाहा वित्या दो अपदान्त विषयए व स्वत्वे ण्विनिरूढा हार्यः । श्वेतवाहस्या
रितु साजस्य ण्विनोपवादेन आपसंख्यानिकेन जस प्रत्ययेनैव सिध्यतीत्यवधेयः हस्तो ण्विन्न एम
पक्रमाश्वेतवाहस्याघ्रदाहारणां तुजस्य विषये ण्विनो पिधा निःक्षितेत्येतावन्मात्राभिप्रायकं ११२

कृतपाकथं विज्ञेयं. न च उसं विना विश्रवयां श्रोतवा इत्यने नरूत्वं निपात्यतामिति वाच्यं. अविशेषेण निपा
तने श्रोतवाहाविल्यादावतिप्रसङ्गः. पदांतविषयत्वेपि श्रोतवोभ्यामित्यादावुत्वं न सिध्येत. तस्मात उस
वाच्य एव. न चैवं श्रोतवा इत्यादिनिपातनं व्यर्थमिति चेत् न. नेत्यसंबुध्यर्थत्वात्. एवं च उस्य शाइत्यपि
संबुध्यर्थं निपातनं कर्त्तव्यं. यदि मंत्रे दर्शनमस्तीति कैयटादयः. एवं स्थिते मंत्रमात्रविषयाणां एषां शब्दा
नां प्रक्रिया कौमुद्यां लौकिकेषु उदाहरणमनुचितं. वैदिकप्रक्रियायां तु युज्यते. उसंतत्वे नसांतप्राति
पदिकेष्वेव उस्याहन्तेर्मुचिता अपि तु अपदांतविषये हकारांतत्वादि कं पुरुकृत्पच्छायपंतत्तरस्य ध
हकेष्वस्का इति बोध्यं. श्रवेयजां ।। विनिः स्पान्मंत्रे. त्वं पत्ते वक्रणास्पा वयाअपि इति काशिका. रहस्यव
पा इति प्रतीकमुपादाय पूर्वसूत्रे विश्रोतवा इत्याद्य हि श्रपश्रवयां श्रोतवा. पुरोडाश्रेति निपातनात
रूत्वमिति हरदत्तः. एतच्च सर्वेषामादिकं णविनपवादो उसमिति भाष्यकैयटादौ स्वग्रंथे च वर्णितं तत्वा
तः. तस्मात् वत्फदात्र तंउसम एवोदाहरणं. सूत्रस्य तु अपदांतविषयसंज्ञांतामचेष्टणीयमिति दिक्
